[1]द्विषत्तापः, [2]संतापी, [3]द्विषन्तपः;

द्विषतीतापः, [A]परन्तपः, [4]शत्रुन्तपः [5]अभितापी, [B] तापः, तितप्सुः, तातपः ;

तप्तव्यम्, निष्टप्तव्यम्, तापयितव्यम्, तितप्सितव्यम्, तातपितव्यम्;

तपनीयम्, तापनीयम्, तितप्सनीयम्, तातपनीयम्;

[6]तप्यम्, ताप्यम्, तितप्स्यम्, तातप्यम्; --

ईषत्तपः-दुस्तपः-सुतपः ; -- -- --

तप्यमानः, ताप्यमानः, तितप्स्यमानः, तातप्यमानः;

तापः-सन्तापः, [7]आतपः, तापः, तितप्सः, तातपः;

तप्तुम्, तापयितुम्, तितप्सितुम्, तातपितुम्;

---

1. असंज्ञायां द्विषन्तं तपतीति विग्रहे शुद्धाद्धातोः 'कर्मण्यण्' (3-2-1) इत्यणि रूपम्।

2. सम्यक् तप्तुं शीलमस्येति **सन्तापी**। ताच्छील्ये णिनिः।

3. द्विषन्तं तापयतीति विग्रहे 'द्विषत्परयोस्तापेः' (3-2-39) इति खच्प्रत्ययः। खचि 'णेरनिटि' (6-4-51) णिलोपे, 'खचि ह्रस्वः' (6-4-94) इति उपधायाः ह्रस्वः। द्विषतस्तकारस्य मुमि संयोगान्तलोपः। एवं परं तापयतीति विग्रहे **परन्तपः** इति भवति। सूत्रे द्वितकारनिर्देशात् तकारान्त एव द्विषच्छब्दे उपपदेऽयं प्रत्ययः, न तु लिङ्गविशिष्टपरिभाषया द्विषतीशब्दे उपपदे; तत्र 'कर्मण्यण्' (3-2-1) इत्यणि **द्विषतीताप** इत्येव भवति।

4. 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' (3-2-46) इति खच्प्रत्ययः संज्ञायाम्। शत्रून् तापयतीति विग्रहे, खचि, मुमागमे, णिलोपे, 'खचि ह्रस्वः' (6-4-94) इति उपधायाः ह्रस्वे, रूपम्।
'विश्वम्भरा, साम रथन्तराख्यम्, पतिंवरा चापि धनञ्जयश्च।
शत्रुंसहः कोऽपि, वसुन्धरा च, **शत्रुन्तपो**ऽरिन्दम एवमूह्यम्॥' इति
**प्रक्रियासर्वस्वे**।

5. 'बहुलमाभीक्ष्ण्ये' (3-2-81) इति णिनिः। असकृत् अभितपतीत्यर्थः।

6. 'पोरदुपधात्' (3-1-98) इति यत्प्रत्ययः।

7. आ=समन्तात् तपतीति **आतपः** = सूर्यप्रभा। 'पुंसि संज्ञायां घः प्रायेण' (3-3-118) इति घः। यद्वा, पचाद्यच्।

A. 'प्रियंवदोऽपि नैवाहं ब्रुवे मिथ्या **परन्तप**।
सख्या तेन दशग्रीवं निहन्ताऽसि **द्विषन्तपम्**॥' भ. का. 6.102.

B. 'द्विषतः परासिसिषुरेष सकलभुवना**भितापिनः**।
क्रान्तकुलिशकरवीर्यबलान्मदुपासनं विहितवान् **महत्तपः**॥' किरातार्जुनीये 12.34.